E-ISSN-2584-2870

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 1 Issue 2 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# किरातार्जुनीयमहाकाव्यस्थानां काव्यदोषाणां समीक्षणम्

**ओमप्रकाश पण्डा**
शोधच्छात्रः,
केन्द्रीय-संस्कृत-विश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

-----------------------------------------

**कूटशब्दाः (Key words)**

काव्यदोषाः, किरातार्जुनीयम्, रसविघातकत्वम्, अस्थानस्थपदत्वम्, पर्यायप्रक्रमभङ्गः ।

**पत्रसारः (Abstract)**

लोके सर्वेऽपि गुणानामेव समादरं कुर्वन्ति, न तु दोषाणाम्। अतः सद्गुणयुक्तानाम् प्रति सर्वेषामादरः स्वाभाविकतया दृश्यते। एतस्मादेव गुणविरोधिनां दोषाणां अनादरः स्वयमेव ज्ञायते। किन्तु गुणाः यदि दोषैः संयुज्यन्ते तर्हि तेऽपि दोषरूपेण परिणमन्ते। अतः उच्यते-

**गुणा गुणज्ञेषु गुणाः भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।**

इति। अतः दोषाः दूरीकर्तव्या एव। एवमेव लोकस्यास्य प्रतिबिम्वरूपे काव्येऽपि विचारोऽयं यथावत् स्वीकृतो वर्तते। काव्यात्मनः रसस्य अभिव्यञ्जका माधुर्यादयो गुणाः सहृदयैः कविभिश्च सदा आद्रियन्ते। किन्तु रसापकर्षलक्षणाः दोषाः सर्वैरपि हेयत्वेन परिगण्यन्ते । काव्यानां पठनेन रसास्वादात् वा यः अनितसाधारणानन्दः प्राप्यते, तत् तत्रस्थानां दोषाणां कारणात् सुतरां विघटितो भवति । अतः दोषैः काव्यस्य परमप्रयोजनमेव विनश्यति इति तु निश्चितम् । अतः रसापकर्षकाः दोषाः परिहर्तव्या एव। रसास्वादे पाषाणायमाना दोषा अपि रसविघातकत्वेनैव दोषत्वं प्राप्नुवन्ति, नान्यथा । 'मुख्यार्थहतिर्दोषः रसश्च मुख्यः' इति तत्स्वरूपं मम्मटाचार्येण स्पष्टमुक्तम् । यदि ते सन्तोऽपि न प्रकाशन्ते, सहृदयहृदये पदं न विदधति, रसं न विघातयन्ति तर्हि तेषां दोषत्वं नैवास्तीत्येव सकलालङ्कारिकाणामेकोऽभिप्रायः । अतः श्रुदिदुष्ट-अक्रमादि'दोषविशेषलक्षण'-समन्वयेऽपि 'रसविघातकत्व'रूप'दोषसामान्यलक्षण'स्य समन्वयाभावे निर्दोषतैव इति निर्णयः।

बहव आलङ्कारिकाः भारवेः काव्यात् दोषाणामुदाहरणं स्वीकृतवन्तः । तेषाम् अवलोकनेन अनेकेषां पद्यानाम् अदोषतैव दृश्यते । केषुचित् पद्येषु दोषो वर्तत एव । काव्येऽस्मिन् पर्यायप्रक्रमभङ्गः, अस्थानस्थपददोषः-इत्यादिदोषाः आलङ्कारिकैः दर्शिताः सन्ति ।

## शोधपत्रम् (Full Paper)

### प्रस्तावना

'गुणाः पुजास्थानम्' इति महाकवेः भवभूतेः वचनानुगुणं सर्वेऽपि गुणानामेव समादरं कुर्वन्ति, न तु दोषाणाम्। अतः सद्गुणयुक्तान् प्रति सर्वेषामादरः स्वाभाविकः दृश्यते लोके इत्यत एव गुणविरोधिनां दोषाणाम् अनादरः स्वयमेव ज्ञायते। किन्तु गुणाः यदि दोषैः संयुज्यन्ते तर्हि तेऽपि दोषरूपेण परिणमन्ते। अत एवोच्यते-

**गुणा गुणज्ञेषु गुणाः भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः ।**

इति। अतः दोषाः सर्वात्मनाऽपि दूरीकर्तव्या एव। एवमेव लोकस्यास्य प्रतिबिम्वरूपे काव्येऽपि विचारोऽयं यथावत् स्वीकृतो वर्तते। काव्यात्मनः रसस्य अभिव्यञ्जका माधुर्यादयो गुणाः सहृदयैः कविभिश्च सदा आद्रियन्ते। किन्तु रसापकर्षलक्षणाः दोषाः सर्वैरपि हेयत्वेन परिगण्यन्ते । काव्यानां पठनेन रसास्वादाद्वा योऽनितसाधारणानन्दः प्राप्यते, तत् तत्रस्थानां दोषाणां कारणात् सुतरां विघटितो भवति । अतः दोषैः काव्यस्य परमप्रयोजनमेव विनश्यति इति तु निश्चितम् । अतः रसापकर्षकाः दोषाः परिहर्तव्या एव। तद्विषये कविभिः सावधानैः भाव्यम् ।

तर्हि काव्यजगति महाकवेः भारवेः पञ्चमहाकाव्येष्वन्यतमे अर्थगौरवयुते प्रसिद्धे 'किरातार्जुनीय'नाम्नि महाकाव्ये दोषाः न सन्ति किम् ? इति पृष्टे सति सन्तीति वक्तुमपि न शक्नुमः, न सन्तीत्यपि वक्तुं न शक्नुमः । यतः तस्य काव्येऽपि दोषा उद्घाट्य दर्शिताः आलङ्कारिकैः । किन्तु तस्य काव्ये रसास्वादमव्याहततया कृतवद्भिः, रसास्वादजनितपरमानन्दमनुभूतवद्भिः सहृदयैः तस्य कृते 'भारवेर्थगौरवमि'ति अभिधानं प्रदत्तमस्ति । तर्हि कः पक्षः साधु ? एतत् निर्णयार्थं काव्यदोषाणां सामान्यस्वरूपमस्माभिः परिशीलनीयं भवति।

**काव्यदोषस्वरूपम्**

काव्ये रसः आत्मस्थानीयः वर्तते । तेन गुणालङ्कारवक्रोक्त्यादीनि सर्वाणि काव्यतत्त्वानि रसमेव परिपोषयन्ति । अत एव रससम्बन्धेनैव तानि तत्त्वानि तत्त्वमवाप्नुवन्ति, नान्यथा । अर्थात् रसाभिव्यञ्जकत्वात् गुणानां गुणत्वम्, रसोत्कर्षकत्वात् अलङ्काराणामलङ्कारत्वम् इत्यादि । तथैव रसास्वादे पाषाणायमाना दोषा अपि रसविघातकत्वेनैव दोषत्वं प्राप्नुवन्ति, नान्यथा । 'मुख्यार्थहतिर्दोषः रसश्च मुख्यः'[1] इति तत्स्वरूपं मम्मटाचार्येण स्पष्टमुक्तम् । यदि ते सन्तोऽपि न प्रकाशन्ते, सहृदयहृदये पदं न विदधति, रसं न विघातयन्ति तर्हि तेषां दोषत्वं नैवास्तीत्येव सकलालङ्कारिकाणा-मेकोऽभिप्रायः । अतः श्रुदिदुष्ट-अक्रमादि'दोषविशेषलक्षण'समन्वयेऽपि 'रसविघातकत्व'रूप'दोषसामान्यलक्षण'स्य समन्वयाभावे निर्दोषतैव इति निर्णयः ।

कवयः यद्यपि अन्तर्दृष्ट्या विशिष्टप्रतिभया च अलौकिकपदमारूढा लोके, तथापि तेऽपि मानवकोटौ वर्तन्त इति सहजा एव दोषास्तन्निर्मितकाव्येषु । किन्तु केषाञ्चन कवीनां काव्येषु ते रसं विघातयन्ति, केषाञ्चन काव्येषु न । काव्येषु कुत्र दोषाः रसविघातका भवन्तीति आनन्दवर्धनाचार्यः सूक्ष्मतया एवं प्रतिपादयति-

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।**
**यस्त्वशक्तिकृतो दोषः स झटित्येवावभासते ॥**[2]

इति। अत्र व्युत्पत्तिपदेन अभ्यासोऽपि गृह्यते । काव्यकारणीभूतांशाः प्रतिभा-व्युत्पत्ति-अभ्यासाः। तेषु व्युत्पत्त्या अभ्यासस्य च कारणात् जायमानो दोषः प्रतिभया संव्रियते । किन्तु प्रतिभाया न्यूनतया जायमानान् दोषान् संवरीतुं न व्युत्पत्त्यभ्यासौ पारयतः । अत एव यः कविः अप्रतिमप्रतिभावान् भवति, तस्य काव्येषु अव्युत्पत्ति-अनभ्यासाभ्यां जाता दोषाः तस्य प्रतिभावशात्, उद्गच्छति रसप्रवाहे तिरोधानं प्राप्य, काव्यरसस्य आस्वादः निरन्तरायो यथा स्यात्तथा कृत्वा, स्वेषां रसविघातजं कलङ्कं मार्जयन्ति । तदा तत्काव्यीयशब्दार्थौ निर्दुष्टावित्येव परिगण्येते । काव्यशब्दार्थयोः एतादृश-निर्दुष्टत्वमेव मम्मटाचार्योक्तकाव्यलक्षणस्थस्य 'अदौषौ' पदस्य पर्यवसितार्थः ।

**किरातार्जुनीयमहाकाव्ये दोषाः**

बहव आलङ्कारिकाः भारवेः काव्यात् दोषाणामुदाहरणं स्वीकृतवन्तः । तेषाम् अवलोकनेन अनेकेषां पद्यानाम् अदोषतैव दृश्यते । केषुचित् पद्येषु दोषो वर्तत एव । तेन विरचितस्य अर्थगौरवयुतस्य महाकाव्यस्य आधारेण तदिदानीं विमृश्यते ।

किरातार्जुनीयमहाकाव्यस्य अष्टमसर्गे जलक्रीडारतायाः नायिकायाः वर्णनप्रसङ्गे-

**प्रियेण सङ्ग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।**
**स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुषु ॥** [3]

इतीदं पद्यं वर्तते । अत्र अस्थानस्थपददोषः मम्मटाचार्येण दर्शितः । अयोग्यस्थानस्थत्वम् अस्थानस्थपदत्वम् । अत्र काचिन्न विजहौ इति वाच्यम् । अस्य अयमेव तात्पर्यर्थः यत् अस्मिन् श्लोके उक्तमस्ति यत् 'न काचित् विजहौ' इति। परन्तु तस्मिन् स्थले 'काचित् न विजहौ' इति वक्तव्यम् । यदि नकारस्य योग: 'काचित्' इत्यनेन क्रियते तर्हि तत्र अर्थो भवति- कयाचित् न त्यक्तम् अर्थात् सर्वाभिरेव त्यक्तमिति। यस्य निषेधो विधीयते तस्य वाचकात् पदात् पूर्वमेव स्थानं निषेधबोधकस्य नपदस्य कृते उचितं भवति। अत्र निषेधनीयस्य त्यागस्य वाचकात् 'विजहौ' इति पदात् पूर्वं नकारस्य स्थानमुचितं वर्तते, परन्तु नकारः अत्र 'काचित्' इति पदात् पूर्वं प्रयुक्त इति नकारः अस्थानस्थपदं भवति । तेनात्र अस्थानस्थपदत्वदोषः। अनेन विवक्षिताद् विरुद्धः 'सर्वाः विजहुः' इति अर्थः प्रतीयते । एवम् अत्र विरुद्धस्य अर्थस्य प्रतीतौ अस्थानस्थपददोषः जातः । पुनश्च-

**यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुं वा ।**
**निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः॥** [4]

---

[1] काव्यप्रकाशः-७/१

[2] ध्वन्यालोकः, तृतीयोद्योतः, Page-67

[3] किरातार्जुनीयम् - ८/३७

[4] किरातार्जुनीयम् - ३/४०

इतीदं पद्यं प्रक्रमभङ्गदोषस्योदाहरणत्वेन प्रस्तुतम् आचार्येमहिमभट्टेन। स च दोषोऽत्र प्रत्ययविषयः। यशोऽधिगन्तुं, मनुष्यसङ्ख्यामतिवर्तितुम् इति उभयत्रापि तुमुना एवोपक्रमः कृतः। तदभ्यन्तरे 'लिप्सया' इत्यत्र सन्प्रत्ययः प्रयुक्तः। तेन मध्ये तुमुन्प्रत्ययस्य प्रक्रमः भग्नः, एकरूपता न रक्षिता। अतः सुखलिप्सया इत्यत्रापि सुखमीहितुम् इति तुमुना एव प्रयोगः युक्तः। तेन 'यशोऽधिगन्तुं सुखमीहितुं वा मनुष्यसङ्ख्यामतिवर्तितुं वा' इत्येवं प्रकारेण एकरूपता समागच्छति। ततो न दोषः।

**विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः।**
**नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥** [5]

किरातार्जुनीयमहाकाव्ये द्वितीये सर्गेऽयं श्लोकः वर्तते। अत्र युधिष्ठिरं प्रति भीमसेनस्य उक्तिः वर्तते। अत्रापि प्रक्रमभङ्गदोष एव। स च दोऽशोऽत्र द्विधा दर्शितः, अत्रोपसर्गस्य पर्यायस्य चेति। "तदभिभवः कुरुते निरायतिम्। लघुतां भजते निरायतिर्लघुतावान्न पदं नृपश्रियः।" इति युक्तम्। अत्र आदौ विपत्तिशब्दस्य प्रयोगः कृतः तदनन्तरम् आपत्तिशब्दस्य प्रयोगः। वि-उपसर्गेण यस्य आरम्भः तस्य समाप्तिः कथमपि आ-उपसर्गेण भवितुं नार्हति। परन्तु अत्र तु तथैव कृतम्। तस्माद् एव अत्र अयम् उपसर्गप्रक्रमभङ्गदोषः सञ्जातः। उपसर्गाश्रयेण अयं दोषः जातः इति अत्र उपसर्गप्रक्रमभङ्ङ्गदोषः। पुनरपि अत्र उपक्रमः लघुताशब्देन जातः लघुताबोधकेन अगरीयानितिशब्देन समाप्तिः जाता। तस्मात् अत्र पर्यायप्रक्रमभङ्गदोषः अपि जातः। अतः आचार्येण अस्य समाधानम् कृतम्-

**"विपदोऽभिभवन्त्यविक्रमं तदभिभवः कुरुते निरायतिम्।**
**लघुतां भजते निरायतिर्लघुतावान्न पदं नृपश्रियः॥"**

इत्यादिना। अत्र विपदः कृते 'तत्' इति सर्वनामशब्दस्य प्रयोगः कृतः। तदभिभवः इत्यस्य अर्थः स्यात् विपत्त्या पराभवः। एवं लघुतायाः उद्देश्य-प्रतिनिर्देश्यरूपेण पुनरुपादानम् अभवत्। विपदः परामर्शः अपि तत्पदेन जातः। वस्तुत भारवेः अस्मिन् श्लोके दोषद्वयं वर्तते, परन्तु एतदेव दोषद्वयं निवारितम् आचार्येण मम्मटेन परञ्च तत्र छन्दोभङ्गः जातः इति कथमपि ग्रहणीयं नास्ति इत्यादि बालबोधिनीटीकातो ज्ञातव्यम्।

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥**[6]

अत्र वाक्यार्थविषयं पौनरुक्त्यम् दोषः। अत्र आपत्तेः मूलकारणं भवति सहसा कार्यकरणम्, तत् अविमृश्यकारितायाः स्वरूपम्। तच्च अविवेकादुत्पद्यते। अनेन प्रकारेण अस्य कार्यकारणभावम् अन्वयवाक्येन उक्त्वा पुनः कारणाभावरूपं विमृश्यकारित्वं, तस्मात् उत्पन्नः विपत्तेरभावः। स च 'सम्पत्तेः सद्भाव' इति कथितः। एवंरूपेण कार्यकारणभावः व्यतिरेकवाक्येन अभिहितः। तस्मात् पुनरुक्तता। तस्य प्रतीतिः अन्वयवाक्येन भवति। यदुक्तं- 'साधर्म्येणापि प्रयोगे अर्थाद् वैधर्मेणान्वयगतिः असति तस्मिन् साम्याभावे हेत्वाभावस्यासिद्धेरिति नावश्यं वाच्यद्वयप्रयोग' इति। अपि च-

**अपरागसमीरणोरितः क्रमशीर्णकुलमूलसन्ततिः।**
**तरुवत् सुकरः सहिष्णुना रिपुरुन्मूलयितुं महानपि॥**[7]

सहनशीलता नाम लोके सर्वसाधकः। तया साधयितुम् अशक्यं किमपि नास्ति। हे भीमसेन ! झञ्झावातेन ताडितस्य यस्य वृक्षस्य अन्ततः शाखामूलादीनि शिथिलानि संवृत्तानि, तस्य तरोः विनाशोऽत्यन्तं शीघ्रमेव भवति। तथैव यस्य राज्ञः प्रजाः बहिः तं प्रणम्य अन्ततः तं द्विषन्ति, तस्य राज्ञः राजत्वस्य शाखा-मूलादीनि शिथिलानि भवन्ति। सहनशीलेन राज्ञा सः सुखेन जेतव्यश्च भवति। यथा वृक्षस्य स्थिरता तस्य मूलस्य दार्ढ्यमवलम्बते तथैव राजत्वस्य स्थिरता प्रजाः, राज्याङ्गभूतानां मन्त्र्यादिसहायकवर्गस्य स्नेह-विश्वासादिकमवलम्बते। शिथिलमूलस्य वृक्षस्य विनाशो यथा शीघ्रं भवति तथैव मदाभिमानादिभिरुद्दण्डस्य, अवज्ञातहितैषिणः राज्ञः पतनम् अत्यन्तं शीघ्रमेव भवति।

यत्र एकस्यार्थस्य विशेषधर्मः अन्यस्मिन्नर्थे आरोप्यते तदा तयोः उपमानोपमेयत्वं शाब्दं न भवेत्। अत्र शाब्दमेव जातमिति दोषः।

## सन्दर्भग्रन्थाः (Bibliography)


**ध्वन्यालोकः**-(तृतीय-चतुर्थ उद्योतौ) Motilal Banarasidas Publication, 2nd Revised Edition-1981

**कुवलयानन्दः** - 'अलङ्कारसुरभि'हिन्दीव्याखोपेतः। चौखम्बा विद्याभवनम्। वाराणसी। चतुर्थसंस्करणम्-१९८३

**किरातार्जुनीयम्**-'घण्टापथ'व्याख्योपेतम्। चौखम्बासुरभारतीप्रकाशनम्। वाराणसी। २०२०.

**काव्यप्रकाशः**-रहस्यबोधिनीटीकासहितः। कृष्णदास अकादमी, वाराणसी। २०१३


---

[5] किरातार्जुनीयम् - २/१४

[6] किरातार्जुनीयम् - २/३०

[7] किरातार्जुनीयम् - २/५०